दिनाङ्क :- 02.08.2026 प्रात: - 06:55

## <u>प्रधानमन्त्री - नशामुक्ताभियानम्</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य दृश्यश्रव्य-अन्तर्जालीयमाध्यमेन विकसितभारत-सङ्कल्पाभियानस्य अन्तर्गतं " मादकद्रव्य-मुक्तयुव-अभियानस्य" शुभारम्भं करिष्यति। 'जनभागीदारी' इत्येतस्य अभियानस्य शतसप्ताह-समापनोपलक्ष्ये एतत् अभियानं प्रवर्त्यते। अस्मिन् कार्यक्रमे देशस्य दशसहस्राधिकस्थानेभ्यः युवानः सहभागं करिष्यन्ति। अस्य पदक्षेपस्य उद्देश्यं युवकान् मादकद्रव्य-दुरुपयोगात् दूरं स्थातुं प्रेरयितुं तथा स्वसमाजेषु सकारात्मक-सामाजिक-परिवर्तनस्य प्रवर्तकान् भवितुं प्रोत्साहयितुं च अस्ति।

---------------------------------------------------

## <u>प्रधानमन्त्री - स्वामी विवेकानन्दः</u>

प्रधानमन्त्री नरेन्द्रमोदी विज्ञान-प्रौद्योगिकी-क्रीडाक्षेत्रेषु सफलतां प्राप्तवतां भारतीययूनां प्रशंसाम् अकरोत् तथा च तान् जलसंरक्षणे, प्राकृतिकसम्पद: संवर्धने, भारतीयकलावस्तूनां संरक्षणे च योगदानं दातुम् आहूतवान्। सः ह्यः मैसूरुनगरे स्वामीविवेकानन्द-सांस्कृतिक-युवकेन्द्रस्य 'विवेक-स्मारकस्य' उद्घाटनानन्तरम् एतद् अवदत्। प्रधानमन्त्री अवदत् यत् स्वामिविवेकानन्दस्य विचाराः युवकानां सशक्तीकरणं राष्ट्रनिर्माणं च प्रोत्साहयन्ति।

---------------------------------------------------

## <u>उज्बेकिस्तानस्य विदेशमन्त्रिणः भारतयात्रा</u>

उज्बेकिस्तानदेशस्य विदेशमन्त्री सईदोव-बख्तियार-ओदिलोविच् इत्येषः अद्यारभ्य अस्य मासस्य पञ्चदिनाङ्कपर्यन्तं भारतस्य आधिकारिकयात्रायां भविष्यति। विदेशमन्त्रालयानुसारम्, स्वयात्रावधौ असौ राष्ट्रपतिपदासीनया द्रौपदीमुर्मुवर्यया सह शिष्टाचारोपसङ्गमार्थं मेलिष्यति तथा विदेशमन्त्रिणा डॉ. एस्. जयशङ्करेण सह अपि वार्तालापं करिष्यति।

सः नवदिल्ल्यां आयोजिते वाणिज्यमञ्चे अपि भागं ग्रहीष्यति।

---------------------------------------------------

केन्द्रराज्य-करविभागः

केन्द्र-प्रशासनेन कर-विभागान्तर्गतम् अतिरिक्त-अंशभागत्वेन राज्य-प्रशासनेभ्यः एकोनविंशत्यधिक-नवोत्तरैकलक्षकोटि-रूप्यकाणि वितरितानि। वित्त-मन्त्रालयेन एकस्मिन् वक्तव्ये प्रोक्तं यत् अस्य अतिरिक्तांशभागस्य उद्देश्यं राज्येभ्यः द्रव्यगत-विकास-व्ययं वर्धयितुं अवसरं प्रदानम् इत्यस्ति। मन्त्रालयपक्षतः निस्सारितस्य राज्यक्रमस्य विवरणानुसारम् उत्तरप्रदेशः सर्वाधिकं अष्टाधिक-द्विशतोत्तर-एकोनविंशतिसहस्रकोटि-रूप्यकाणि अलभत, तदनन्तरं बिहार-राज्यं पञ्चचत्त्वारिंशदधिक-अष्टशतोत्तर-दशसहस्रकोटि-रूप्यकाणि अथ मध्यप्रदेश-राज्यं च दशाधिक-अष्टसहस्रकोटि-रूप्यकाणि प्राप्नोत्। पश्चिमबङ्गाल-राज्यं षट्षष्ट्यधिक-अष्टशतोत्तर-सप्तसहस्रकोटि-रूप्यकाणि महाराष्ट्र-राज्यं च द्वाविंशत्यधिक-सप्तसहस्रकोटि-रूप्यकाणि अलभत। लघुराज्यानि केन्द्रशासित-प्रदेशाश्चापि स्व-स्व-भागम् अवाप्नुवन्, तत्र सूच्यां सिक्किम-राज्येन पञ्चषष्ट्यधिक-त्रिशतकोटि-रूप्यकाणि, गोवा-राज्येन अष्टनवत्यधिक-त्रिशतकोटि-रूप्यकाणि नागालैण्ड-राज्येन च चतुर्विंशत्यधिक-पञ्चशतकोटि-रूप्यकाणि न्यूनतम-आवण्टनेषु सम्प्राप्तानि।

---------------------------------------------------

यूरोपः - वनाग्निः

दक्षिणपश्चिम-फ्रांसदेशे प्रज्वलिते भीषण-वनाग्नौ अग्निशमनदलैः अद्य नियन्त्रणं प्राप्तम्। अनेन प्रायः अष्टनवति-सहस्राधिकैक-लक्षजनाः स्वगृहाणि प्रत्यागताः। तथापि दक्षिण-फ्रांसदेशे अथ ग्रीसदेशे च नव-वनाग्नि-प्रज्वलनात् पुनः जननिर्वासन-कार्यक्रमः आरब्धः।

---------------------------------------------------

राष्ट्रमण्डलक्रीडा

ग्लास्गो-नगरे प्रवर्तमानासु राष्ट्रमण्डलक्रीडासु भारतं एकोनचत्वारिंशत्-पदकैः सह पदकतालिकायां चतुर्थस्थानम् अधिगतवत्। भारतस्य पदकतालिकायां अधुना त्रयोदश स्वर्णपदकानि, सप्तदश रजतपदकानि, नव कांस्यपदकानि च सन्ति। भारतस्य नूतनपदकं

पञ्चसहस्र-मीटर-मितायां धावनस्पर्धायां गुलवीरसिंहेन प्राप्तं कांस्यपदकम् अस्ति। मुष्टामुष्टि-स्पर्धासु भारतेन उत्कृष्टं प्रदर्शनं कृतम्, यत्र सप्त-स्वर्णपदकानि तथा त्रीणि-रजतपदकानि प्राप्तानि। पैरा एथलेटिक्स इत्येतस्मिन् अपि भारतेन ऐतिहासिकी उपलब्धिः प्राप्ता। पुरुषाणां शॉटपुट-एफ्-57 इत्येतस्यां स्पर्धायां सोमन-राणा स्वर्णपदकं, शुभम-जुयालः च रजतपदकं प्राप्तवान्। अनेन परिणामेन भारतेन अस्यां स्पर्धायां प्रथमवारं राष्ट्रमण्डलक्रीडासु स्वर्णपदकं प्राप्तम्, अथ एकस्याम् एव स्पर्धायां प्रथमवारं पदकद्वयं प्राप्तम्।

---

ऋतुविभागः

भारतर्तुविज्ञान-विभागेन अद्य कर्नाटक-केरल-माहे-नागालैण्ड-मणिपुर-मिजोरम-त्रिपुरा-राजस्थान-उपहिमालयीय-पश्चिमबङ्गाल-सिक्किमेषु अतिवृष्ट्यै नारङ्गवर्णीय-सञ्चेतना प्रसारिता। तथैव दिल्ली-हरियाणा-पञ्जाब-चण्डीगढ-उत्तराखण्ड-हिमाचलप्रदेश-जम्मू-कश्मीर-लद्दाख-अरुणाचलप्रदेश-असम-मेघालय-बिहार-पूर्वोत्तरप्रदेश-गुजरात-कोङ्कण-गोवा-मध्यप्रदेश-ओडिशा-अण्डमान-निकोबार-द्वीपसमूहेषु अपि अतिवृष्टेः सम्भावना व्यक्ता। आगामि-द्विदिनेषु एतेषु क्षेत्रेषु अतिवृष्टेः सम्भाव्यते इति विभागेन पूर्वानुमानितम्।

।। इति वार्ताः।।